# शिक्षा निदेशालयः

## राष्ट्रीय राजधानी क्षेत्रम् दिल्ली

## मूल्यपरक प्रश्नाः(सहायक सामग्री ) 2012-2013

**विषय संस्कृत**

**कक्षा- दशमी**

***मार्गदर्शन :***

**डॉ0 सुनीता एस0 कौशिक**

अतिरिक्त शिक्षा निदेशक (स्कूल/परीक्षा)

***समन्वय :***

डा.सन्ध्या शर्मा, उपप्रधानाचार्या

राजकीय कन्या उच्च. माध्यमिक, विवेक विहार फेस–II

***तैयारकर्ता :***

| | | |
|---|---|---|
| 1. श्रीमती प्रभा सकलानी | टी.जी.टी. संस्कृत | राजकीय कन्या उच्च. माध्यमिक विद्यालय, विवेक विहार फेस–II |
| 2. श्रीमती करूणा भारद्वाज | पी.जी.टी. संस्कृत | राजकीय प्रतिभा विकास विद्यालय, सूरजमल विहार |
| 3. श्रीमती रानी शर्मा | टी.जी.टी. संस्कृत | राजकीय कन्या उच्च.माध्यमिक विद्यालय, कान्ति नगर |
| 4. श्रीमती सुनीत बाला | टी.जी.टी. संस्कृत | राजकीय कन्या उच्च. माध्यमिक विद्यालय, झिलमिल कॉलोनी |
| 5. श्रीमती मोनिका | टी.जी.टी. संस्कृत | राजकीय कन्या उच्च. माध्यमिक विद्यालय, विवेक विहार |

**संशोधन कर्त्री**

श्रीमती सुबीना देवी

राजकीय कन्या उच्च. माध्यमिक विद्यालय

विवेक विहार फेस–II

# षष्ठः पाठः
# साधुवृत्तिं समाचरेत्

अधो लिखितं वाक्याशं पठित्वा एकपदेन उत्तर

1. साधुवृत्तिं समाचरेत्

प्रश्न- नरः कीदृशीं वृत्तिं समाचरेत् ?

2. प्रशस्तः मार्गः एवं अनुसरणीयः।

प्रश्न-कीदृशः मार्ग एवं अनुसरणीयः?

3.आपदां तरणिः धैर्यम्। इदानी विषादं  त्यक्त्वा उद्यमः क्रियताम्।

क.प्रश्न-किम् त्यक्त्वा उद्यमः क्रियताम्?

ख.प्रश्न- धैर्यम् कासाम् तरणिः?

4.अहो! कुमार्गम् आश्रितस्य कीदृशी क्लेश परम्परा।

घ.कम् आश्रितस्य क्लेश परम्परा भवति ?

5.बालकाः गर्तसंकुले , नतोन्नते विषमे मार्गे क्रीडन्ति स्म ?

च.बालकैः कुत्र न क्रीडितव्यम्?

6.चौरकर्म निन्दनीय कर्म अस्ति ?

छ.प्रश्न- चौरकर्म कीदृशं कर्म अस्ति ?

7. पापिनाञ्च सदा दुःखं, सुखं वै पुण्यकर्मणाम्।

एवं स्थिरतरं ज्ञात्वा साधुवृत्तिं समाचरेत्।।

ज. प्रश्न. पुण्यकर्मभिः सदा किम् प्राप्यते ?

# संभावित/ अपेक्षित उत्तराणि

1. साधुवृत्तिं 2. प्रशस्तः 3. आपदां 4. कुमार्गम्

5. गर्तसंकुले मार्गे 6. निन्दनीयम् 7. सुखम ।

# सप्तमः पाठः

# ‘‘रमणीया हि सृष्टिरेषा’’

(1) वाक्यानि पठित्वा वाक्याधारितान् प्रश्नान् उत्तरत-

1. ‘‘रमणीया हि सृष्टिरेषा’’ अत्र सृष्टिः कीदृशी वर्तते ?

2. ‘‘जीवाः सर्वेऽत्र मोदन्तां भावयन्तः परस्परं’’। अत्र सर्वे जीवाः किम् कुर्वन्तु ?

3. ‘‘न तावत् कलहेन समयं वृथा यापयेत्’’ समयं वृथा केन न यापयेत् ?

4. ‘‘ आयुषः क्षणमेकोऽपि, न लभ्यः स्वर्णकोटिकैः’’ स्वर्णकोटिकैः को न लभ्यो भवति ?

5. ‘‘सर्वेषामेव महत्वं विद्यते यथासमयम्’’। यथासमयम् केषाम् महत्वं विद्यते ?

(2) विकल्पेभ्यः शुद्धं उत्तरम् चित्वा लिखत-

1. सर्वे जीवाः मिलित्वा जीवनं कीदृशं कुर्युः ?

1.कलहमयं 2. मलिनं 3. रसमयं 4. असफलम्

1. इमां सृष्टिं केन कार्येण दूषितां न कुर्यात्

1.दुष्कार्येण 2. सद्कार्येण 3. चलनेन 4. हसनेन

2. परस्परं कलहं कृत्वा किं भविष्यति ?

1. उन्नतिः 2. लाभः 3. हानिः 4. मिलनम्

3. अस्माकं सर्वेषाम् जननी का अस्ति ?

1.प्रकृतिः 2. सर्वा 3. चतुरा 4. बुद्धि

4. प्रकृतिः किं भूत्वा सर्वान जीवान् पालयति ?

1. मातृरूपा 2. चतुरा भूत्वा 3. मनुष्यरूपा 4. प्रकृति रूपा

5. अस्मिन् जगति संसारस्य शोभा के वर्धयन्ते ?

1. पक्षिणः 2. पशवः 3. मनुष्याः 4. सर्वे प्राणिनः

6. सर्वैः जीवैः एव कस्याः शोभा अस्ति ?

1. प्रकृतेः 2. मातापित्रोः 3. जीवनस्य 4. दिनस्य

7. संसारे प्रत्येक वस्तुजीवः च महत्वशीलः वर्तते अतः सर्वैः केषां सम्मानंकर्तव्यम्

1.केषाम् अपि न 2. सर्वेषाम् 3. आत्मानम् 4.दुःखीनाम्

8. आयुषः एकः क्षणः अपि कीदृशः कुर्यात्?

1. सार्थकः 2. असफलः 3. भेदरूपः 4. व्यर्थः

9. स्वजीवने सर्वे स्व-स्व कार्यक्षेत्रे किम कुर्युः ?

1. स्वकर्तव्यम् 2. कलहम् 3. ईर्ष्याम् 4.नाशम्

(3) उचितं मेलनं कुरूत-

| | |
|---|---|
| 1. आयुषः क्षणमेकोऽपि | क. हंसो हंसः बको बकः |
| 2. जीवाः सर्वेऽत्र मोदन्ताम् | ख. न लभ्यः स्वर्णकोटिकैः |
| 3. नीरक्षीर विवेके तु | ग. का नु हानिस्ततोऽधिका |
| 4. स चेन्निरर्थकं नीतः | घ. काकः काकः पिकः पिकः |
| 5. वसन्तसमये प्राप्ते | ड. भावयन्तः परस्परम् |

# संभावित/ अपेक्षित उत्तराणि

(1)

(1) रमणीया

(2) मोदन्ताम्

(3) कलहेन

(4) आयुषः क्षणमेकोऽपि

(5) सर्वेषामेव

(2)

(1) रसमयम्

(2) दुष्कार्येण

(3) हानिः

(4) प्रकृतिः

(5) मातृरूपा

(6) सर्वे प्राणिनः

(7) प्रकृतेः

(8) सर्वेषाम्

(9) सार्थकम्

(10) स्वकर्तव्यः

(3)

(1) ख

(2) ङ.

(3) क

(4) ग

(5) घ

# अष्टम पाठः
# तिरूक्कुरल् सूक्ति सौरभम्

(क) श्लोकान् पठित्वा प्रश्नानाम् उत्तराणि दीयताम्-

(1) पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।

पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ।।

प्र01. पिता पुत्राय बाल्ये किं यच्छति?

प्र02. पुत्रः कि प्राप्य कृतज्ञतामनुभवति ?

प्र03. विद्याधनं प्राप्य पुत्रः किमनुभवति ?

(2) अवक्रता यथा चिते तथा वाचि भवेद् यदि।

तदेवाहुः महात्मानः समत्वमिति तथ्यतः।।

प्र04. वाचि चित्ते च किं भवेत् ?

प्र05. समत्वम् किं भवति ?

(3) त्यक्त्वा धर्मप्रदां वाचं परूषां योऽभ्युदीरयेत् ।

परित्यज्य फलं पक्वं भुङ्.क्तेऽपक्वं विमूढधीः ।।

प्र06. बुद्धिमान् कीदृशीं वाणीं वदति ?

(4) आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।

तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः।।

प्र07. मनुष्यस्य प्रथमो धर्मः किं भवति ?

प्र08. प्राणेभ्यः अपि किं रक्षणीयम् ?

(ख) विकल्पेभ्यः शुद्धम् उत्तरम् चित्वा लिखत-

प्र01. कविः धर्मप्रदायाः वाण्याः तुलनां पक्वफलेन सह करोति यतः पक्वफलम् -

क. कटुकं भवति ख. मधुरं भवति

ग. सुलभं भवति घ. दुर्लभं भवति

प्र02. ये परेभ्यः अहितं कुर्वन्ति ते कदापि ________ न प्राप्नुवन्ति ?

क. विद्याम् ख. सुखानि

ग. दुःखानि घ. धनम्

प्र03. परैः कः न परिभूयते ?

क. निर्भयः नरः ख. कातरः नरः

ग. गुणवान् नरः घ. वाचालः नरः

प्र04. वाक्पटुः कः भवति ?

क. यः अधिकं वदति ख. यः अल्पं वदति

ग. यः स्वविचारान् उचितशब्दैः प्रकटीकरोति

घ. यः अविचार्य किमपि वदति

(ग) मेलनं कुरूत-

| क | ख |
|---|---|
| मूढपुरूषस्य वाणी | विद्याधनम् यच्छति |
| पिता पुत्राय | परैः न परिभूयते |
| परेभ्यः न कुर्यात् | धर्मप्रदां वाचम् |
| बुद्धिमान् नरः न त्यजति | परूषा भवति |
| धैर्यवान् नरः | अहितम |

# संभावित/ अपेक्षित उत्तराणि

(क) **उत्तराणि**

1 विद्याधनम्

2 विद्याधनम्

3 कृतज्ञता

4 अवक्रता

5 वाचि चित्ते च सरलता

6. धर्मप्रदाम्

7. आचारः

8. सदाचारः

(ख) वैकल्पिक प्रश्नानाम् उत्तराणि-

1 ख-मधुरं भवति

2 ख- सुखानि

3. क- निर्भयः नरः

4. ग- यः स्वविचारान् उचितशब्दैः प्रकटीकरोति।

(ग) उत्तराणि

मूढपुरूषस्य वाणी-परूषा भवति

पिता पुत्राय- विद्याधनं यच्छति

परेभ्यः न कुर्यात् - अहितम्

बुद्धिमान् नरः न त्यजति- धर्मप्रदां वाचम्

धैर्यवान् नरः - परैः न परिभूयते

# नवमः पाठः

# राष्ट्र संरक्ष्यमेव हि

(1) वाक्यानि पठित्वा अधोलिखितान् प्रश्नान् उत्तरत-

1. वीरजननी त्वं शोचितुम् न अर्हसि ।

प्र0.का शोचितुम न अर्हति ?

2. अस्त्रशिक्षा प्रदानात् पूर्वम् आचार्यः पुत्रम् सावधानम् अकरोत् ।

प्र0. अस्त्रशिक्षा प्रदानात् पूर्वम् आचार्यः किम् अकरोत् ?

3. राष्ट्रं संरक्ष्यमेव हि

प्र0. किम् संरक्ष्यम् अस्ति ?

4. तस्मिन् चञ्चले क्रूरे च द्रोणपुत्रे न विश्वसितव्यम्।
प्र0. कीदृशे नरे न विश्वसितव्यम्?
5. कथमपि एतौ निवारणीयौ, अन्यथा सकलं जगत् ध्वस्तं भविष्यति।

भो वीरौ! संहरतम् संहरतम् निजास्त्रे ।

प्र0. यदि ब्रह्मास्त्रस्य प्रयोगः भविष्यति। तदा किम् ध्वस्तम् भविष्यति ?

11. श्लोकं पठित्वा अधोलिखितान् प्रश्नान् उत्तरत-

1. परमापद्गतेनापि नैव तात त्वया रणे ।

इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः ।।

प्र0. परमापद्गतेनापि ब्रह्मास्त्रम् केषु न प्रयोक्तव्यम् ?

2. **अस्त्र** ब्रह्मशिरो यत्र परमास्त्रेण वध्यते।

समाः द्वादश पर्जन्यस्तद् राष्ट्रं नाभिवर्षति ।।

प्र0. यत्र ब्रह्मास्त्रः परमास्त्रेण वध्यते, तस्मिन्

राष्ट्रे द्वादश वर्षणि यावत् किम् न भवति ?

(3) विकल्पेभ्यः उचितम् उत्तरम् चित्वा लिखत-

1. स तत् चक्रं स्वस्थानात् संचालयितुम् अपि समर्थः

न अभवत् - इदं वाक्यं कम् भावम् प्रकटीकरोति ?

अ. चक्रस्य भारम् अधिकम् आसीत् ।

ब. अश्वत्थामा तत् चक्रम् प्रयोक्तुम् योग्यः न आसीत् ।

स. अश्वत्थामा कातरः आसीत् ।

2. प्रार्थितं ते मया चक्रं देवदानवपूजितम् ।

अजेयः स्यामिति विभो! सत्यमेतद् ब्रवीमि मे ।।

प्र0. अश्वत्थामा दिव्यम् चक्रम् किमर्थम् वाञ्छति स्म ?

अ. सः अजेयः भवितुम् इच्छति स्म ।

ब. चक्रम् ब्रह्मास्त्रात् श्रेष्ठतरम् आसीत् ।

स. श्रीकृष्णस्य चक्रम् तस्मै रोचते ।

3. भीमः युधिष्ठिरं प्रति भ्रात! द्रौणिम् अनुगन्तुम्

महयम् अनुमतिं ददातु भवान् ।'' अत्र भीमः

अनुमतिं गृहीत्वा किमर्थम् गन्तुम् इच्छति स्म ?

अ. भीमः ज्येष्ठभ्रातुः विभेति स्म।

ब भीमः स्व- विवेकेन निर्णयं कर्तुम् सक्षमः नासीत्।

स. भीमः ज्येष्ठभ्रातुः सम्मानम् करोति स्म ।

4. अर्जुनः ''उत्सृज्यते मया ब्रह्मास्त्रम् अस्त्रम्

अस्त्रेण शाम्यताम् । अत्र अर्जुनस्य का भावना

प्रकटीभवति ?

अ. अर्जुनः स्व शक्तिम् प्रदर्शयितुम् वाञ्छति ।

ब. अर्जुनः पृथ्वीम् द्रोणपुत्रेण कृतेन अनर्थेन रक्षितुम् वाञ्छति।

स. अर्जुनः द्रोणपुत्रम् हन्तुम् वाञ्छति।

5. अस्त्रं ब्रह्मशिरो यत्र परमास्त्रेण वध्यते

समाः द्वादश पर्जन्यस्तद् राष्ट्रं नाभिवर्षति ।।

अस्मात् श्लोकांशात् किम् स्पष्टम् भवति ?

अ. ब्रह्मास्त्रम् प्राप्य वयं गौरवान्विताः स्म।

ब. अस्त्रं निवारयितुम् परमास्त्रस्य प्रयोगः कर्तव्यः।

स. भीषण - अस्त्राणाम् प्रयोगेण राष्ट्रस्य हानिः भवति ।

4. संवादम् पठित्वा प्रत्येकम् वाक्यस्य समक्षम् लिखत

किम् कर्तव्यम् किम् च न कर्तव्यम् ?

अ. अस्त्रशिक्षा योग्यछात्राय एव दातव्या ।

ब. पिता केवलं प्रेमवशात् पुत्राय अस्त्रशिक्षां यच्छतु।

स. अस्त्रशिक्षा प्रदानात् पूर्वम् शिष्यम् सावधानम् कुर्यात् ।

द. रणे भीषण- अस्त्राणाम् प्रयोगः कर्त्तव्यः

5. उचितम् मेलनम् कुरूत -

| | |
|---|---|
| क. द्रौणी पापकर्मा आसीत् | 1. शोचितुम् न अर्हति |
| ख. द्रौपदी धैर्यम् धारयितुम् न शक्नोति । | 2. यावत् क्रूरकर्मा द्रौणी न दण्ड्यते । |
| ग. वीरजननी | 3. यतः तेन द्रौपद्याः पुत्राः हताः। |
| घ. द्रौपदी तस्मात् स्थानात् तावत् गन्तुम् न इच्छति स्म । | 4. यतः तस्याः पुत्राः हताः । |

# संभावित/ अपेक्षित उत्तराणि

1\. 1. वीरजननी, 2. पुत्रम् सावधानम् 3. राष्ट्रम् 4. चच्चले, क्रूरे च,

5\. सकलं जगत्

2\. 1. मानुषेषु, 2. पर्जन्यः न अभिवर्षति,

3\. 1. ब. अश्वत्थामा तत् चक्रम् प्रयोक्तुम् योग्यः न आसीत्।

2\. अ. सः अजेयः भवितुम् इच्छति स्म।

3\. स. भीमः ज्येष्ठभ्रातुः सम्मानम् करोति स्म।

4\. ब. अर्जुनः पृथ्वीम् द्रोणपुत्रेण कृतेन अनर्थेन रक्षितुम् वाञ्छति।

5\. स. भीषण- अस्त्राणाम् प्रयोगेण राष्ट्रस्य हानिः भवति।

4\. (अ. कर्तव्यम्,) (ब. न कर्तव्यम्,) (स. कर्तव्यम्) (द. न कर्तव्यम्)

5\. क-3, ख-4, ग-1, घ-2

# दशमः पाठः

# “ सुस्वागतं भो ! अरूणाचलेऽस्मिन्’

1. विकल्पेभ्यः शुद्धम् उत्तरं चित्वा लिखत -

प्र01. “ सुस्वागतं भो ! अरूणाचलेऽस्मिन्’ पाठस्य शीर्षकः अस्माकं संस्कृतेः कां परम्परां प्रदर्शयति ?

क. गुरू- भक्ति - परम्पराम्।

ख. मातृ- पितृ- भक्ति - परम्पराम्।

ग. अतिथि - सत्कार- परम्पराम् ।

घ. विश्वबन्धुता - मैत्री- परम्पराम् ।

प्र02. भारतीय- संस्कृतेः - अतिथि- सत्कार- परम्पराम् अभिव्यक्तुम् आदर्श- वाक्यं किम् अस्ति ?

क. मातृ देवो भव ।

ख. आचार्यः देवो भव ।

ग. पितृ देवो भव।

घ. अतिथिः देवो भव ।

प्र03. अस्माभिः आगन्तुकैः सह कीदृशः व्यवहारः करणीयः ?

क. दुर्व्यवहारः ?

ख. कटु- व्यवहारः ।

ग. मधुर- व्यवहारः।

घ. रूक्ष - व्यवहारः ।

प्र04. अस्माभिः अतिथि - सत्कार - परम्परायां किं न करणीयम् ?

क. स्वागत- गानम् ।

ख. मुरव्य द्वार- सज्जाम् ।

ग. जलपानादि- व्यवस्थाम् ।

घ.  अशिष्ट- भाषणम् ।

2.  वाक्यानि पठित्वा प्रश्नानाम् उत्तराणि लिखत -

क.  " सुसज्जिते प्रवेशद्वारे सुन्दरैः अक्षरैः लिखितम् - स्वागतं कुर्मः " ।

प्र0.  यदा अन्येभ्यः देशेभ्यः जनाः अस्माकं

देशम् आगच्छन्ति तदा अस्माभिः किं करणीयम् ?

ख.  प्रधानाचार्यः- ' अस्मिन् मनोरमे अरूणाचल- प्रदेशे भवतां सर्वेषां हार्दिकं स्वागतम्।

प्र0.  विद्यालयस्य प्रधानाचार्यः छात्राणां दलं किं कथयति ?

ग.  तेषां स्वागताय प्रवेशद्वारम् उभयतः स्थितः

बालसमूहः मधुरस्वरेण गायति ।

प्र01.  बालसमूहः मधुरस्वरेण किमर्थम् गायति ?

प्र02.  प्रवेशद्वारम् उभयतः स्थितः बालसमूहः किं करोति ?

घ.  प्रधानाचार्यः शोभनम् ! एतेषां दर्शनाय

सम्पूर्णा व्यवस्था वर्तते । कार्यक्रमस्तु सुनिश्चितः । जलपानाद् अनन्तरं गमिष्यामः।

प्र0.  प्रधानाचार्यः छात्रदलं कस्मात् अनन्तर गन्तुं वार्तां कथयति ?

ड.  अरूणाचलप्रदेशस्य एकस्मिन् विद्यालये अद्य उत्सवस्य वातावरणम्।

प्र0.  अरूणाचलप्रदेशस्य एकस्मिन् विद्यालये अद्य कीदृशं वातावरणम् अस्ति ?

3.  समुचित मेलनं कुरूत-

| | | | |
|---|---|---|---|
| क. | विद्यालये अद्य उत्सवस्य वातावरणम् | 1. | "स्वागतं कुर्मः "। |
| ख. | 'ईटा' हि यस्यास्ति पुरी प्रधाना | 2. | अस्य प्रदेशस्य दर्शनीय स्थलानां दर्शनाय विशेष प्रबन्धः अस्तिः |
| ग. | सुसज्जिते प्रवेशद्वारे सुन्दरैः | 3. | यतः छात्राणाम् एकः दलः पर्यटनार्थम् आगच्छति। अक्षरैः लिखितम् |

घ. सभागारे पर्यटनाधिकारी कथयति 4. सुस्वागतं भो ! अरूणाचलेऽस्मिन् ।

ङ. अस्माकं पर्वाणि 5. अस्माकम् उत्सवप्रियसंस्कृतेः द्योतकानि सन्ति।

# संभावित/ अपेक्षित उत्तराणि

1. ग. अतिथि- सत्कार- परम्पराम्।

2. घ. अतिथि- देवो भव।

3. ग. मधुर- व्यवहारम्।

4. घ. अशिष्ट- भाषणम्।

2. उत्तराणि

क. यदा अन्येभ्यः देशेभ्यः जनाः अस्माकं देशम् आगच्छन्ति, तदा अस्माााभिः तेषां स्वागतं करणीयम्।

ख. विद्यालयस्य प्रधानाचार्यः कथयति- अस्मिन् मनोरमे अरूणाचल प्रदेशे भवतां सर्वेषां हार्दिकं स्वागतम्।

ग.1. बालसमूहः मधुर स्वरेण आगन्तुकछात्राणां स्वागताय गायति।

2. प्रवेश द्वारम् उभयतः स्थितः बालसमूहः स्वागत गीतं गायति।

घ. प्रधानाचार्यः छात्रदलं जलपानाद् अनन्तरं गन्तुं वार्तां कथयति।

ङ. अरूणाचल प्रदेशस्य एकस्मिन् विद्यालये अद्य उत्सवस्य वातावरणम् अस्ति,।

3. क.2. , ख.4., ग.1., घ.2, ङ.5,

# एकादशः पाठः

# कालोऽहम्

**(क)** प्रश्नानाम् उत्तराणि दीयताम्-

सर्वस्तरतु दुर्गाणि, सर्वो भद्राणि पश्यतु।

सर्वः कामानवाप्नोतु, सर्व सर्वत्र नन्दतु।।

प्र01. सर्वः कानि तरतु?

प्र02. सर्वः कानि पश्यतु?

प्र03. सर्वः कान् अवाप्नोतु?

प्र04. कालस्य शुभाशंसा केषां कृते अस्ति ?

प्र05. अस्माभिः केन समं सततं चलनीयम् ?

प्र06. तदैव समारोहस्य कश्चन् विद्वान् सङ्.कल्पवाचनं करोति - शुभकार्यं सदा केन प्रारब्धव्यम् ?

प्र07. कः सर्वदा विद्यमानः ?

प्र08. इयम् सृष्टि प्राचीना नवीना वा ?

प्र09. कति युगानि ?

प्र010. ब्रह्मणः आयुः कति वर्षाणि ?

ख. विकल्पेभ्यः शुद्धम् उत्तरं चित्वा लिखत-

प्र01. वर्तमानयुगस्य किं नाम-

क. त्रेतायुग ख. द्वापरयुगम्

ग. कलियुगम् घ. सतयुगम्

प्र02. सर्वस्तरतु दुर्गाणि____________ अत्र कालः केषां कृते शुभाशंसां करोति ?

क. भारतवासीनां कृते ख. सर्वेषां कृते

ग. विदुषां कृते घ. छात्राणां कृते

प्र03. अखण्डः शाश्वतः विभुः निरन्तरं गतिमानः

क. जगत् ख. कालः

ग. नरः घ. सूर्यः

प्र04. प्राचीनभारते कालस्य गणनायाः आधारः कः ?

क. सूर्यः ख. चन्द्रमा

ग. नक्षत्रम् घ. तारकसमूहः

# संभावित/ अपेक्षित उत्तराणि

क. उत्तराणि

1. दुर्गाणि
2. भद्राणि
3. कामान्
4. सर्वेषां कृते
5. कालेन समम्
6. सङ्.कल्पवाचनेन
7. कालः
8. प्राचीना
9. चत्वारि
10. शतम्

ख. उत्तराणि

1. ग.- कलियुगम्

2. ख- सर्वेषां कृते

3. ख- कालः

4. क- सूर्यः